नामांक Roll No.

No. of Questions – 20

No. of Printed Pages – 11

**S-71-Sanskritam (T.L.)**

8456797

# माध्यमिक परीक्षा, 2024

# SECONDARY EXAMINATION, 2024

## तृतीय भाषा – संस्कृतम्

**समय : 3.15 (सपादहोरात्रयम्)**

**पूर्णाङ्क : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशा :

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्डः – अ

1. वस्तुनिष्ठप्रश्नाः

(i) राजसिंहः नाम राजपुत्रः वसति स्म – 1

(अ) जवलाख्यग्रामे (ब) देउलाख्यग्रामे

(स) धवलाख्यग्रामे (द) नवलाख्यग्रामे

(ii) प्रजासुखे कस्य सुखम् ? 1

(अ) देवस्य (ब) वानरस्य

(स) राज्ञः (द) नरस्य

(iii) पिता पुत्राय बाल्ये किं यच्छति ? 1

(अ) गृहधनम् (ब) वस्त्रधनम्

(स) विद्याधनम् (द) वस्तुधनम्

(iv) कस्य उपशमनस्य स्थिरोपायः नास्ति ? 1

(अ) मानवस्य (ब) रोगस्य

(स) आलस्यस्य (द) भूकम्पस्य

(v) बाष्पयानमाला किं वितरन्ती संधावति ? 1

(अ) धूमम् (ब) ध्वानम्

(स) जलम् (द) वस्त्रम्

(vi) सर्वकार्येषु सर्वदा का बलवती भवति ? 1

(अ) रीतिः (ब) संस्कृतिः

(स) बुद्धिः (द) नतिः

(vii) "पशुपतिश्चलति" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति – 1

(अ) पशुपतिर् + चलति (ब) पशुपतिस् + चलति

(स) पशुपतिश् + चलति (द) पशुपतिष् + चलति

(viii) 'पण्डितः + जनः' इत्यस्य सन्धिपदमस्ति – 1

(अ) पण्डितश्जनः (ब) पण्डिताजनः

(स) पण्डितोजनः (द) पण्डितर्जनः

(ix) जश्त्वसन्धेः उदाहरणमस्ति – 1

(अ) षष्ठः (ब) सम्यगुक्तम्

(स) उत्पन्नम् (द) सच्चित्

(x) सत्वसन्धेः उदाहरणमस्ति – 1

(अ) नमस्ते (ब) कोऽपि

(स) नमोनमः (द) मुनिरिति

(xi) "रामलक्ष्मणौ" इत्यस्य पदस्य समासविग्रहः अस्ति – 1

(अ) राम च लक्ष्मण च (ब) रामस्य लक्ष्मणस्य च

(स) रामश्च लक्ष्मणश्च (द) रामः लक्ष्मणः

(xii) कर्मधारयसमासस्य उदाहरणमस्ति – 1

(अ) पितरौ (ब) नीलकमलम्

(स) पंचपात्रम् (द) पीताम्बरः

(xiii) "नीलकण्ठः" इत्यत्र कः समासः ? 1

(अ) अव्ययीभावः (ब) बहुव्रीहिः

(स) द्वन्द्वः (द) द्विगुः

(xiv) "उत्थापयितुम्" इत्यत्र पदे कः उपसर्गः ? 1

(अ) अव (ब) अप

(स) उद् (द) अधि

(xv) "दुर्बलम्" इत्यत्र उपसर्गं शब्दं च पृथक् कृत्वा लिखत। 1

(अ) दुर् + बलम् (ब) दु + बलम्

(स) दुस् + बलम् (द) दु + र्बलम्

2. निर्देशानुसारं रिक्तस्थानानि पूरयत –

(i) सा _______ गीतं गायति । (कुमार + ङीप्) **1**

(ii) _______ संसारे पूज्यते । (गुण + मतुप्) **1**

(iii) लोकहितं मम _______ । (कृ + अनीयर्) **1**

(iv) _______ नाम किम् ? (युष्मद् – शब्दस्य षष्ठीविभक्ति – एकवचनम्) **1**

(v) _______ स्वस्ति । (छात्र–शब्दस्य चतुर्थीविभक्ति – एकवचनम्) **1**

(vi) सः कन्दुकेन _______ । (क्रीड्धातु – लट्लकारः) **1**

(vii) श्वः अहं कार्यं _______ । (कृधातु – लृट्लकारः) **1**

3. अधोलिखितं अपठितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

(अ) समाजे नियमानां पालनम् अनुशासनं भवति । जीवने अनुशासनस्य विशेषं महत्त्वं भवति । प्रत्येकस्मिन् पदे अनुशासनम् आवश्यकं भवति । अनुशासनं विना किमपि कार्यं सफलं न भवति । छात्रेभ्यः अनुशासनं व्यवस्थायै परमावश्यकमस्ति । अनुशासितः जनः सर्वेभ्यः प्रियः भवति । सामाजिकव्यवस्थायै अनुशासनमत्यन्तम् आवश्यकमस्ति । यस्मिन् समाजे अनुशासनं न भवति तत्र सदैव कलहः भवति । शिक्षकस्य अनुशासने छात्राः निरन्तरम् उन्नतिपथे गच्छन्ति । प्रकृतिरपि ईश्वरस्य अनुशासने तिष्ठति । यः नरः पूर्णतया अनुशासनं पालयति सः स्वजीवने सदा सफलः भवति ।

अतिलघूत्तरात्मक–प्रश्नाः –

(क) एकपदेन उत्तरत । **½ × 4 = 2**

(i) जीवने कस्य विशेषं महत्त्वमस्ति ?

(ii) शिक्षकस्य अनुशासने के उन्नतिपथे गच्छन्ति ?

(iii) कीदृशः जनः सर्वेभ्यः प्रियः भवति ?

(iv) प्रकृतिरपि कस्य अनुशासने तिष्ठति ?

(ख) पूर्णवाक्येन उत्तरत ।

(i) अनुशासनं किं भवति ? **1**

(ii) किमर्थम् अनुशासनमत्यन्तम् आवश्यकमस्ति ? **1**

(iii) कः सदा सफलः भवति ? **1**

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **1**



BOARD ZONE

(घ) भाषिककार्यम् – ½ × 4 = 2

(i) "अनुशासनस्य विशेषं महत्त्वं भवति" इत्यत्र कर्तृपदं लिखत ।

(ii) "अनुशासनम् आवश्यकं भवति" इत्यत्र विशेष्यपदं किम् ?

(iii) "अप्रियः" इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iv) तत्र सदैव कलहः भवति । अत्र क्रियापदं लिखत ।

(ब) अधोलिखितौ संख्यावाचिशब्दौ संस्कृतेन लिखत । 1 + 1 = 2

(i) 118

(ii) 222

खण्डः – ब

4. विद्यालयं निकषा देवालयः अस्ति । रेखांकितपदे विभक्तिं तत्कारणं च लिखत । 2

5. रामं नमः । वाक्यं संशोधयत । 2

6. सुराधिपः ताम् अपृच्छत् । रेखांकितपदे प्रश्ननिर्माणं कुरुत । 2

7. सर्वे प्रकृतिमातरं प्रणमन्ति । रेखांकितपदे प्रश्ननिर्माणं कुरुत । 2

8. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसंगं भावार्थं लिखत । 2

संपत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ।।

9. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत । 2

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ।।

अन्वयः – राज्ञः (i) ______ सुखं (ii) ______ हिते हितं च, आत्मप्रियं (iii) ______ न हितं तु प्रजानां (iv) ______ हितम् ।

| प्रजानां, राज्ञः, प्रजानां, प्रियं |
|---|

10. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात् । 2

11. "जननी तुल्य वत्सला" इति पाठसारं हिन्दीभाषायां लिखत । 2

12. पर्यायपदं मेलयत । ½ × 4 = 2

| | (क) | (ख) |
|---|---|---|
| (i) | कानने | शृगालः |
| (ii) | जम्बुकः | समयः |
| (iii) | वेला | चन्द्रः |
| (iv) | हिमकरः | वने |

13. मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत । 1 + 1 + 1 = 3

| बहिः, जवेन, शनैः, एकत्र |
|---|

(i) अश्वः _______ धावति ।

(ii) पिपीलिका _______ चलति ।

(iii) ग्रामात् _______ विद्यालयः अस्ति ।

## खण्डः – स

14. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते । प्रकृतिसमक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव, तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम् । तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पुञ्जीकरणीयम् अन्यथा असन्तुलन वशादभूकम्पः सम्भवति । वस्तुतः शान्तानि एव पञ्चतत्त्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते । अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति ।

(क) एकपदेन उत्तरं लिखत । ½ × 2 = 1

(i) किं नाम भूकम्पः ?

(ii) कीदृशः मानवः वामनकल्पः ?

(ख) पूर्णवाक्येन उत्तरं लिखत । $1 \times 2 = 2$

(i) पञ्चतत्त्वानि कानि ?

(ii) भूकम्पविशेषज्ञाः किं कथयन्ति ?

(ग) यथानिर्देशम् उत्तरं लिखत । $\frac{1}{2} \times 2 = 1$

(i) "अशान्तानि महाविनाशम् उपस्थापयन्ति" इत्यत्र कर्तृपदं लिखत ।

(ii) "भूकम्पः सम्भवति" इत्यत्र क्रियापदं लिखत ।

अथवा

वनस्य दृश्यं समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यति, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति । एवमेव वानराः वारं-वारं सिंहं तुदन्ति । विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ।

(क) एकपदेन उत्तरं लिखत । $\frac{1}{2} \times 2 = 1$

(i) कः सुखेन विश्राम्यति ?

(ii) वनस्य दृश्यं समीपे का वहति ?

(ख) पूर्णवाक्येन उत्तरं लिखत । $1 \times 2 = 2$

(i) के सिंहं तुदन्ति ?

(ii) कः पुच्छं धुनाति ?

(ग) यथानिर्देशम् उत्तरं लिखत । $\frac{1}{2} \times 2 = 1$

(i) "हर्षमिश्रितं कलरवम्" इत्यत्र विशेषणपदं लिखत ।

(ii) "वानरः वृक्षोपरि आरोहति" इत्यत्र क्रियापदं लिखत ।

15. अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।
करणीयं बहिरन्तर्जगति तु बहुशुद्धीकरणम् ।

(क) एकपदेन उत्तरं लिखत । $\frac{1}{2} \times 2 = 1$

(i) किं भृशं दूषितम् ?

(ii) समलं किम् ?



BOARD ZONE

(ख) पूर्णवाक्येन उत्तरं लिखत । 1 × 2 = 2

(i) भक्ष्यं कीदृशं जातम् ?

(ii) बहुशुद्धीकरणं कुत्र करणीयम् ?

(ग) यथानिर्देशम् उत्तरं लिखत । ½ × 2 = 1

(i) "निर्मलं जलम्" इत्यत्र विशेष्यपदं लिखत ।

(ii) "बहुशुद्धीकरणं करणीयम्" इत्यत्र क्रियापदं लिखत ।

**अथवा**

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाःश्च नागाश्च वहन्ति बोधिताः ।
अनुक्तमप्यूहति पण्डितो जनः,
परेङ्गितज्ञानफला हि बुद्धयः ।

(क) एकपदेन उत्तरं लिखत । ½ × 2 = 1

(i) उदीरितोऽर्थः केन गृह्यते ?

(ii) अनुक्तम् अपि ऊहति कः ?

(ख) पूर्णवाक्येन उत्तरं लिखत । 1 × 2 = 2

(i) के के बोधिताः वहन्ति ?

(ii) बुद्धयः कीदृशाः भवन्ति ?

(ग) यथानिर्देशम् उत्तरं लिखत । ½ × 2 = 1

(i) "पण्डितः जनः" इत्यत्र विशेषणं किम् ?

(ii) "बोधिताः वहन्ति" इत्यत्र क्रियापदं लिखत ।

16. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।

विदूषकः – इत इत आर्यौ !

कुशलवौ – (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः – युष्मद्दर्शनात् कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजन-समुचितस्य कण्ठाश्लेषस्य । अहो हृदयग्राही स्पर्शः ।

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम् ।

रामः – सव्यवधानं न चारित्रलोपाय ।

(क) एकपदेन उत्तरं लिखत । ½ × 2 = 1

(i) कुशलवौ कस्य कुशलं पृच्छतः ?

(ii) "इत इत आर्यौ" इति कः कथयति ?

(ख) पूर्णवाक्येन उत्तरं लिखत । 1 × 2 = 2

(i) वयमत्र कस्य भाजनम् ?

(ii) राजासनम् एतत् किमर्थं न युक्तम् ?

(ग) यथानिर्देशम् उत्तरं लिखत । ½ × 2 = 1

(i) "हृदयग्राही स्पर्शः" इत्यत्र विशेष्यपदं लिखत ।

(ii) "अध्यास्यतां सिंहासनम्" इत्यत्र क्रियापदं किम् ?

**अथवा**

काकः -- रे परभृत् ! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

गजः – समीपतः एवागच्छन् अरे ! अरे ! सर्वं सम्भाषणं शृण्वन्नेवाहम् अत्रागच्छम् । अहं विशालकायः, बलशाली, पराक्रमी च । सिंहः वा स्यात् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि । किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय ।

वानरः – अरे ! अरे ! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति)

(क) एकपदेन उत्तरं लिखत । ½ × 2 = 1

(i) परभृतः के ?

(ii) कः विशालकायः ?

(ख) पूर्णवाक्येन उत्तरं लिखत । 1 × 2 = 2

(i) गजः जन्तुं कथं मारयिष्यति ?

(ii) वानरः कस्य पुच्छं विधूय वृक्षोपरि आरोहति ?

(ग) यथानिर्देशम् उत्तरं लिखत । ½ × 2 = 1

(i) "करुणापरः काकः" इत्यत्र विशेष्यपदं लिखत ।

(ii) "अहं सन्ततिं पालयामि" इत्यत्र क्रियापदं लिखत ।

17. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत । 3

(i) मूषकः परिश्रमेण जालम् अकृन्तत् ।

(ii) एकदा सः जाले बद्धः ।

(iii) सिंहः जालात्-मुक्तः भूत्वा मूषकं प्रशंसन् गतवान् ।

(iv) एकस्मिन् वने एकः सिंहः वसति स्म ।

(v) सः सम्पूर्णं प्रयासम् अकरोत् परं बन्धनात् न मुक्तः ।

(vi) तदा तस्य स्वरं श्रुत्वा एकः मूषकः तत्र आगच्छत् ।

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया "संस्कृतभाषायाः महत्त्वम्" इति विषये षट्-संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत ।

| |
|---|
| संस्कृतभाषा, संस्कृतिः, सङ्गणकस्य, भाषाजननी, वेदाः, वैज्ञानिकी |

## खण्डः – द

18. भवान् राजकीय-आदर्श-उच्च माध्यमिक-विद्यालयस्य छात्रः देवः अस्ति । भवतः गृहे भगिनी-विवाहः अस्ति । अतः स्वकीयं प्रधानाचार्यं प्रति अवकाशार्थं प्रार्थनापत्रं लिखतु । 4

**अथवा**

भवती शारिका अस्ति । स्वकीयां सखीं प्रति उद्यानभ्रमणविषये अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत ।

| |
|---|
| भोजनम्, जनाः, नमोनमः, नौकाविहारम्, पशुपक्षिणः, कुशलम्, आनन्ददायकम्, कपोतः |

प्रिय सखि गीते !

सादरं (i) ________

अत्र (ii) ________ तत्रास्तु । ह्यः अहम् उद्यानभ्रमणार्थं गतवती । उद्याने (iii) ________ आसन् । तत्र (iv) ________ इतस्ततः भ्रमन्ति स्म । श्वेतः (v) ________ तत्रासीत् । तत्र उद्याने जनाः एकत्र उपविश्य (vi) ________ खादन्ति स्म । अहं नद्यां (vii) ________ कृतवती । उद्यानभ्रमणम् (viii) ________ आसीत् ।

भवदीया सखी

शारिका

19. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन **अष्ट** वाक्यानि जन्तुशालायाः विषये लिखत । 4

| मयूराः, मात्रा सह, सिंहः, बालकः, पश्यन्ति, जन्तुशाला, शुकः, मृगः । |
|---|



**अथवा**

मञ्जूषातः उपयुक्तपदानि गृहीत्वा गुरुशिष्ययोः मध्ये क्रीडायाः विषये संवादं पूरयत ।

| सह, करोषि, बहुलाभम्, आवश्यकता, क्रीडाङ्गणे, क्रीडायाम्, अधुना, अध्ययनम् |
|---|

अध्यापकः – प्रवीण ! त्वम् अत्र किं (i) ________ ?

प्रवीणः – हे गुरो ! अहं (ii) ______ किमपि न करोमि ।

अध्यापकः – तर्हि गच्छ । तव मित्राणि तत्र (iii) ________ क्रीडन्ति, तैः (iv) ________ क्रीड ।

प्रवीणः – मम (v) ________ रुचिः नास्ति । अतः अहं न क्रीडामि ।

अध्यापकः – स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महती (vi) _______ भवति ।

प्रवीणः – यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम (vii) ________ बाधितं भविष्यति ।

अध्यापकः – क्रीडायै स्वल्पसमयम् एव प्रयच्छ । अल्पसमयः अपि शरीराय (viii) ________ प्रदास्यति ।

20. अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत । 4

(i) हम सब छात्र हैं ।

(ii) नदी के पास मेरा घर है ।

(iii) गोविन्द कल आयेगा ।

(iv) वह जोर से हँसता है ।

(v) वह घोड़े से गिरा ।

(vi) तुम मेरे साथ पढ़ो ।




BOARD ZONE

DO NOT WRITE ANYTHING HERE

BOARD ZONE

अन्य विषय के Chapter-wise PYQ (Previous Year Questions) खरीदने के लिए हमारी वेबसाइट boardzone.in पर Visite करें या हमें 921-6765-400 पर व्हाट्सएप करें।




- Chapter-wise PYQ
- Handwritten Notes
- More.....



RBSE

CBSE

MP - BOARD

More